# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रीप्रथमवर्षम् (SEM- 1) **प्रश्नपत्रम्** – ६ **गुणाः** - ७०

**विषयः** - साहित्यम् **कोड** – **CC 1.1.2** **समयः** - ०२ तः ०५

**दिनाङ्कः** - २०/१२/२०१८ **सन्दर्भग्रन्थः** – रघुवंशम्

**(NEW & OLD)**

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ अधोलिखितेभ्यः कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत|** १०

१) व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ॥

२) धनुर्भृतोऽप्यस्य दयाऽऽर्द्रभावमाख्यातमन्तःकरणैविशङ्कैः ।
विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ॥

३) तां देवतापित्रतिथिक्रियाऽर्थामन्वग्ययौ मध्यमकपालः ।
बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना ॥

**प्रश्नः – २ अधोलिखितयोः कस्यचिदेकस्य उपरि निबन्धं लिखतु ।** १०

**१) सिंहस्य आक्रमणम्**

**२) दिलीपस्य गो-सेवा**

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः व्याख्यां कुरुत|** १०

१) अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥

२) सा दुष्प्रधर्षा मनसाऽपि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥

३) कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥

**प्रश्नः – ४ अधोलिखितयोः कस्यचिदेकस्य उपरि साराशं लिखतु ।** १०

**(१)रघुवंशमहाकाव्यस्य द्वितीयसर्गीया कथा सङ्क्षेपेण लेख्या**

**(२)महाकविकालिदासस्य जीवनचरित्र वर्णयत ।**

## तृतीयान्वितिः(Unit - 3)

**प्रश्नः – ५ अधोलिखितेभ्यः कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत** **१०**

१. स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥

२. अथैकधेनोरपराधचण्डाद् गुरोः कृशानुप्रतिमाद् बिभेषि
शक्योऽस्य मन्युर्भवता विनेतुं गा कोटिशः स्पर्शयता घटोध्नीः ॥

३. क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥

**प्रश्नः – ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु** **१०**

**१) एकविंशति– दिवसस्य वर्णनं कुरुत ।**

**२) नन्दिनी – परीक्षणम् इति विषये चर्चयतु ।**

## अन्वितयः १ – ३ (Unit 1 – 3)

**प्रश्नः – ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानाममिलघूत्तराणि लिखन्तु ।** **१०**

१) प्रजानामधिपः कः ?

२) रघुवंशमहाकाव्यस्य रचनाकार कः ?

३) राजदिलीपस्य धेनोः नाम किम् ?

४) तृण – शब्दस्य कोऽर्थः ?

५) राजदिलीपस्य गुरोः नाम किम् ?

६) अरण्य-शब्दस्य कोऽर्थः ?

७) नन्दन्याः पृष्ठे कः अन्वगच्छत् ?

८) वशिष्ठस्य पत्न्या नाम किम् ?

९) कः प्रजार्थं महिष्या समं व्रतमधारयत् ?

१०) सिंहः कस्योपरि आक्रमणं अकरोत् ?

११) कस्य वेगः पर्वतस्य समीपे निष्फलो भवति ?

१२) 'पर्वतस्य' अपरं नाम किम् ?

१३) दिलीपस्य पत्न्या नाम किम् ?

१४) रघुवंशे द्वितीयसर्गे कस्य छ्न्दसः अधिकः प्रयोगः अस्ति ?

१५) तृतीयसर्गे कति श्लोकाः सन्ति ?

*****************